कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M-2479 विषय ज्योतिष

नाव वेदांग ज्योतिष

लेखक / लिपीकार

पृठ 03 काळ पूर्ण / अपूर्ण

M-2479
॥अथज्योतिषप्रारंभः॥

॥श्रीगणेशायनमः॥ ॐ मू॥ पंचसंवत्सरमयंयुगाध्यक्षंप्रजापतिं॥ दिनर्त्वयन
मासांगंप्रणम्यशिरसाशुचिः॥ प्रणम्यशिरसाकालमभिवाद्यसरस्वतीं॥ कालज्ञा
नंप्रवक्ष्यामिलगधस्यमहात्मनः॥ ज्योतिषामयनंकृत्स्नंप्रवक्ष्याम्यनुपूर्वशः॥ विप्रा
णांसंमतंलोकेयज्ञकालार्थसिद्धये॥ निरेकंद्वादशार्द्धाब्दंद्विगुणंगतसंज्ञिकं॥ ष
ष्ट्याषष्ट्यायुतंद्वाभ्यांपर्वणांराशिरुच्यते॥ स्वराक्रमेतेसोमार्कौयदासाकंसवासवौ॥
स्यात्तदादियुगंमाघस्तपःशुक्लोऽदिनंत्यजः॥१॥ प्रपद्येतेश्रविष्ठादौसूर्याचांद्रमसा
वुदक्॥ सार्पार्द्धेदक्षिणार्कस्तुमाघःश्रावणयोःसदा॥ घर्मवृद्धिरपांप्रस्थःक्षपाह्रा
सउदग्गतौ॥ दक्षिणेतौविपर्यस्तौषण्मुहूर्त्ययनेनतु॥ द्विगुणंसप्तमंचाहुरयनाद्यं
त्रयोदश॥ चतुर्थंदशमंचैवद्वियुग्माद्यंबहुलेप्यृतौ॥ वसुस्त्वष्टाभगोजश्चमित्रःस

पश्विनीजलं ॥ धानाकश्वायनाधाश्वाद्धपंचनभस्त्वतुः ॥ भांशास्तुरस्त्काः ॥ का
र्यः पक्षाद्वादशाचोद्गता ॥ एकादशगुणस्योनः शुक्लेर्दुश्चैंद्रवायदि ॥ २ ॥ कार्यभां
शाष्टकास्थानेकलाएकाभविंशतिः ॥ उनस्थानेर्द्विसमतीरुद्धपेदूनसंगमिताः ॥ त्र्यं
हंशीभशोषोदिवसांशाभागश्चतुर्दशस्याप्युपनीतरभिन्नं ॥ भार्द्धेऽधिकेचाधिगतेप
रेंशेद्वावुत्तमेकंनवकेरवेद्यं ॥ पक्षात्संचदशाच्चोर्ध्वंतद्धुकमितानिर्दिशेत् ॥ नवकभे
ल्लूडुतेंशास्याद्दूनांद्वाब्धाधिकेनतु ॥ जोद्राघः स्वेश्वेहीरोषाचिन्मूषसपः सोमाधानः ॥ ण्यः १५
रेम्रभाश्वाओजास्त्रिष्वोहर्येष्ठाइत्यृक्षालिंगेः ॥ जावाघंरोः समंगविघात्पूर्वर्द्धिपार्व
सूत्तरे ॥ भादानांशाच्चतुर्दशीकाष्ठानांदशबिका कलाः ॥ ३ ॥ कलादशाचविंशास्याद्दमु
हूर्तस्तुनाडिके ॥ द्विंशंशल्लत्कलामात्रषट्शतीव्याधिकंभवेत् ॥ नाडिकेद्वेमुहूर्तस्तुपं

वे॰ ज्यो॰
२

चाशत्पलमाषकं ॥ माषकात्कुंभको द्रोणः कुटपैर्वर्द्धते त्रिभिः ॥ ससतकुंभयुक्स्यो
नः सूर्यघोनिंत्रयोदश ॥ नवमानि च पंचान्हेः काष्ठाः पंचाक्षरास्मृताः ॥ श्रविष्ठाभ्यां
गुणाभ्यस्तान् प्राग्विलग्नान्विनिर्दिशेत् ॥ सूर्यान्मासान्षलभ्यस्तान्विद्याचांद्रम
सान्तृतून् ॥ अतीतपर्वभागेषु शोधयेद्द्विगुणांतिथिं ॥ तेषु मंडलभागेषु तिथिनि
ष्ठांगतोरविः ॥ ४ ॥ याः पर्वभादानकलास्तासु सप्तगुणांतिथिं ॥ प्रक्षिपेत्कलासमू
हस्तु विद्यादादानकीः कलाः ॥ यदुत्तरस्यायनतोयनं स्याच्छेषं तु यद्दक्षिणतोयनस्य
॥ तदेव षष्ट्या द्विगुणं विभक्तं सद्वादशं स्याद्दिवसप्रमाणं ॥ तदर्धं दिनभागानां सदाप
र्वणिपर्वणि ॥ ऋतुशेषं तु तद्विद्यात्संख्याय सह पर्वणां ॥ इत्युपायसमुद्देशो भूयोप्ये
नं प्रकल्पयेत् ॥ ज्ञेयराशिंगताभ्यस्तान्विभजेज्ञानराशिषु ॥ अग्निः प्रजापतिः सो

राम
२

मोरुद्रोऽदितिर्बृहस्पतिः॥ सर्पाश्चपितरश्चैवभगश्चैवार्यमाऽपिच॥ ५॥ सविताल
ष्टाथवायुश्चेंद्राग्नीमित्रएवच॥ इंद्रोनिर्ऋतिरापोवैविश्वदेवास्तथैवच॥ विष्णुर्व
सवोवरुणोऽजएकपात्तथैवच॥ अहिर्बुध्न्यस्तथापूषाश्विनौयमएवच॥ नक्षत्र
देवताएताएताभिर्यज्ञकर्मणि॥ यजमानस्यशास्त्रज्ञैर्नामनक्षत्रजंस्मृतं॥ इत्ये
तन्मासवर्षाणांमुहूर्तोदयपर्वणां॥ दिनर्त्वयनमासांगंव्याख्यानंलगधोब्रवीत्॥ सो
मसूर्यस्त्रिचरितोलोकान्लोकेचसंमितं॥ सोमसूर्यस्त्रिचरितोऽविद्वान्वेदविदश्नुते॥
६॥ विषुवंतद्गुणंद्वाभ्यांरूपहीनंतुषड्गुणं॥ यल्लब्धंतानिपर्वाणितथोर्ध्वंसाऽतिथि
र्भवेत्॥ माघशुक्लप्रपन्नस्तुपौषकृष्णसमापिनः॥ युगस्यपंचवर्षाणिकालज्ञानंप्रच
क्षते॥ तृतीयांनवमींचैवपौर्णमासींत्रयोदशीं॥ षष्ठींचविषुवांप्रोक्तोद्वादश्यांचसमं

ज्यो०
३

भवेत्॥चतुर्द्दशीमुपवसथस्तथाभवेद्यथोदितोदिनमुपैतिचंद्रमाः॥माघशुक्ला
न्हिकोयुंक्तेशविष्ठायांचवार्षिकीं॥यथाशिखामयूराणांनागानांमणयोयथा॥त
द्वद्वेदांगशास्त्राणांज्योतिषंमूर्द्धनिस्थितं॥वेदाहियज्ञार्थमभिप्रवृत्ताःकालानुपू
र्वाविहिताश्चयज्ञाः॥तस्मादिदंकालविधानशास्त्रंयोज्योतिषंवेदसवेदयज्ञान्यो
ज्योतिषंवेदसवेदयज्ञानिति॥७॥पंचसंवत्सरंमपघेतेकार्याःकलादशाचयाःपर्व
सवितागविषुवंसम॥ ॥इतिवेदांगज्योतिषंसमाप्तं॥ ॥श्रीरस्तुशुभंभवतु

राम
३